सुरिकाउ॰ श्रीगणेशायनमः॥ ॥सुरिकाशस्त्रिकाप्रोक्तःतत्तुल्याधारणाग्रतः॥ तद्ग्रन्थकस्त्रिखंडोयंसुरिकाग्रंथ
मुच्यते॥१॥गुरुतःप्राप्तविद्यस्यततयैवलब्धज्ञातप्रणवमंत्रस्यषडंगयोगेधिकारइति॥तदर्थमुत्तरग्रंथः
सुरिकामित्यादि॥सुरिकासुरिकामिवसंसारोऽछित्तयेशस्त्रिकामिवरूपकं॥धारणांआत्मनिचित्तावस्थाल
क्षणां॥उक्तंचयोगयाज्ञवल्क्ये॥शमादिगुणयुक्तस्यमनसःस्थितिरात्मनि॥धारणेत्मन्यसंसक्तिःशास्त्रतास्य
र्थवेदिभिरिति॥नपुनर्जन्मभवतीतिशेषः॥सधारणावानकृतश्चिद्पराधाद्यदियोगभ्रष्टोभवति॥तर्हिजन्मांतरे
योगयुक्तएवजायतेइत्यर्थः॥यागश्चित्तवृत्तिनिरोधः॥तत्रतंत्रेहिसंयोगंलभतेपौर्वदेहिकमितिस्मृतेः॥वेदेहि॥ह
ठंयोगंस्वरूपंवेदनतत्प्रार्थनपरमार्थतेनविहितंविधिविषयीकृतं॥स्वयंभुवाब्रह्मणायथोक्तंयथावर्त्ततथोक्तंन
विसंवादीत्यर्थः॥तदुक्तंयोगयाज्ञवल्क्येनावक्ष्यामियोगसर्वस्वंब्रह्मणाकीर्त्तितंपुरेति॥आत्मोक्तंपरमेणेतिचयो
गस्वरूपंसाधयितुंषडंगान्याहनिःशब्दमिति॥यदुक्तं॥कांतारेविजनेदेशेफलमूलोदकान्वितेतपश्चरन्यसन्नित्यमि
तिषडंगलक्षणान्यमृतबिंदोपुक्तानियमनियमयोः॥पूर्वकांडादवसिद्ध्यादिहानभिधानं॥तुकापालिकवदनंगीकृ
रात्॥यमायथा॥अहिंसासत्यमस्तेयंब्रह्मचर्यंदयार्जवं॥क्षमाधृतिर्मिताहारःशौचंचेतियमादश॥नियमायथा
तपःसंतोषआस्तिक्यंदानमीश्वरपूजनं॥सिद्धांतश्रवणंचैवह्रीर्मतिश्चजपोहुतमिति॥अवस्थितेनआस्थितआ
रूढः॥तदुक्तं॥गीतासु॥शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः॥नात्युच्छ्रितंनातिनीचंचेलाजिनकुशोत्तरमिति॥
तथातंत्रेणासनंपद्माद्यास्थितइत्यपिबोद्ध्यं॥तदुक्तंहठप्रदीपिकायां॥हठस्यप्रथमांगत्वादासनंपूर्वमुच्यते॥तदु
र्यादासनस्थैर्यमारोग्यंचांगलाघवमिति॥कूर्मोगानीचेतिप्रत्याहारउक्तः॥अत्रइंद्रियाणीतिशेषः॥तदुक्तंइंद्रिया
णांविचरतांविषयेष्वस्वभावतः॥बलादाहरणंतेषांप्रत्याहारःसउच्यतेइति॥अंतरप्रत्याहारस्त्विंद्रियेमनइतिहृदिस्थ
स्तुंडरीकेमनोनिरोधदोषस्मरणात्॥तदुक्तं॥कर्मेंद्रियाणिसंयम्यथआस्तेमनसास्मरन्॥इंद्रियार्थान्विमूढात्मा
मिथ्याचारःसउच्यतइति॥मात्रेतिह्रस्वमात्रानादबिंदावुक्ताघोषिणीप्रथममात्रेत्यादिना॥तत्रेषःइत्यंतःप्रण
वेशनेरुद्ध्वाशिनेनवायुंपूरयेत्॥कीदृशेनमात्रा॥अकारोऽकारमकारार्द्धमात्राख्याश्चतस्रःसंतासांप्रत्येकंशिखस्ति

MEMORIAL



Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तारब्रह्मकुंडलीमनः प्राणाग्निभिर्भित्वाकटंविशद्विचक्रस्थानमर्गलांभेत्तुमायातिजीवः॥तांसुषुम्नांपूरयेत्पूर्व्यामुखेन॰
यतःसावधानःपूरयेदितिपाठेदधीतिनिमित्तसप्तमीफलमपिचनिमित्तंभवति॥दधेःप्रास्यथेमूर्धमारोहयेदित्यर्थमनसा
सुस्वरंमनःप्रकृतिकंसुस्वरंशास्त्रनिष्ठांतमनएवेत्यर्थः॥सुतीक्ष्णांतर्कणेनघर्षणोपलेनानिशानस्थानीययाशास्त्रीयबुद्ध्या
निर्मलंपादस्थेतिप्राणतःपादस्थश्रुत्यंतरोक्तस्यपुरुषादस्थानीयस्योपरितद्उपासनयामर्जयन्निर्मलीकृत्यभृजयेद्ः
नात्कोत्यपुरुषंरसःश्रमणःपादांयथा॥तदेवतुष्पादप्राणत्वंवायवःपादः प्राणःपादः चक्षुःपादःश्रोत्रंपादइत्यध्यात्ममथाधिदै-
वतमग्निःपादोवायुःपादआदित्यःपादादिशःपादइत्युभयमेवाधिदैवमध्यात्मंचैवाधिदेवतांचेति॥अथवाप्रणवचत्वार्य-
क्षराण्येवजाग्रदादिरूपाणिपादाः॥ओमित्येतदक्षरस्यपादाश्चत्वारःअथवशिरोवक्तेतत्त्वमसिइत्यरूपंभूतादित्यरूपंनामतद्वाच
कःशब्दःतद्वयंश्रमणोलोमस्थानीयंस्वरूपाद्वक्तयेन्निवर्तयेत्तद्विषयांवृत्तिंभूतबुद्धिंमार्गेणत्यजेदित्यर्थः॥इदमेवतस्य
निष्कर्षनंयद्विषयीकरणंमनोमयत्वात्संसारस्यमनसासुकृतस्यस्वरूपाभावात्॥दृढपक्षेउत्तरमार्गरोधकंसग्रंथनाडीच-
क्रंछिंद्यात्तदुक्तं॥नासारक्षिणमार्गवाहिपवनःप्राणातिदीर्घीकृतश्चंद्राभःपरिपूरितामृततनुःप्राक्घटिकाचांतरा॥छिंद्यात्का
लविशालचक्रिवशगानभ्रूरंध्रनाडीगणान्तत्कार्यंकुरुतेपुनर्नधतरंछिन्नद्रुमस्कंधवदिति॥किंकृत्वानिष्कर्षनंयदेतआह॥
मनइतिमनसोपायेननित्यशोभीक्ष्णंयोगंजीवात्मपरमात्मनोपरंवयंपश्चांतरंयोगमुद्योगमाश्रित्यकीदृशंयोगंइत्यत्र-
ज्वलतिनथाप्रोक्तं॥यथेंधोवज्रेणमघभिनत्त्येवंवयंयोगाग्निद्यवासनाजालंइवज्रोधिधुततत्तुल्यंयाकुंडल्यानाडी
जालंवोच्छिनत्तिपुनःकीदृशंमर्मणोजंघायाअनुकीर्तनंयस्मिन्सतिजंघारूपंमर्मध्यानस्थानंयत्रकथितंजंघाग्र-
हणंगुल्फादेरप्युपलक्षणंतुल्यन्यायत्वात्अंगुल्फादिमूलानांमर्मणामनुकीर्तनात्॥मर्मजंघानुकीर्तनमितिपा
ठेयथाभाषितनक्षुरस्यतेक्ष्ण्यज्ञानायजंघानुकृंततेमुंडयतेतथातन्नाडीमर्मस्थानानिनाडीमलानुकृंतनेन-
निर्मलीक्रियंतइत्यर्थः॥तदितिनक्षुरेनयोग्यतावशमन्मर्मजंघादिगुणीभूतमपिपरामृश्यतेसएषइमंमिंद्रवज्रयो
गंजिह्वायास्तालुमूलेप्रथशार्थंजिह्वामूलसूक्ष्मकृंतनरूपंहटयोगिनावर्णयंतितदुक्तंखेचर्यां॥तालुमूलंसमुत्कृंत्य-
सप्तवारंपरमात्मवित्॥स्वगुरूक्तप्रकारेणमलंसर्वंविशोधयेत्॥सुहीपत्रनिभंशस्त्रंसुतीक्ष्णंस्निग्धनिर्मलं॥समादायय
त्तस्तेनरोममात्रंससुछिदेत्॥एवंक्रमेणषण्मासंनित्ययुक्तःसमाचरेत्॥षण्मासाद्रसनामूलशिरानबंधःप्रणश्यतीति



ततोदोहनमुक्तं॥अथयागीश्वरीनामशिरोधस्त्रणवेक्ष्येत्॥शनैरुत्कर्षयोगात्तथेत्यादिविधानविरतिः॥प्रवेशोप्युक्तःयदाब
ह्यमार्गेणजिह्वाग्रमखिलंव्रजेत्॥तदाग्रमार्गलंदेविभुंद्यद्विरदोरधि॥अंगुल्यग्रेणसंधृत्यजिह्वांतत्रप्रवेशयेदिति॥त
तोजिह्वायामथनाभ्यासात्फलमप्युक्तं॥एवंद्वादशवर्षांतसंसिद्धिःपरमेश्वरि॥शरीरंसकलंविश्वंपश्येत्स्वात्मविभेदतइति
सहजनरःपंथाः॥उरोरितिऊरुग्रहणमुत्तरोत्तरस्थानोपलक्षणंऊरार्मध्येसमनस्कंप्राणंसंस्थाप्यमर्मणःप्राणस्यचवि-
मोचनंकर्त्तव्यंअस्मिन्मर्मण्यहंस्थितइत्यभिमानंत्यक्त्वानिरालंबस्थितिरित्यर्थः॥एवंस्थानांतरेष्वप्युह्यं॥अथवासर्व
त्राच्छेदनंव्यवधायकंनाड्यादिविदार्यस्थानांतरेगमनंचतुरितिउत्तरोत्तरेषुचतुर्षुगुदशिश्ननाभिहृदयेषुस्थानेष्वभ्यास
योगेननामरूपमर्मप्राणान्छिंदेत्॥अथवाचतुर्वारंचतुरात्र्यांप्रातर्मध्याह्नसायंनिशीथेचसर्वेषुस्थानेष्वभ्यास-
योगेनाभ्यासेछेदनदेहाभिमानत्यागेचदेहपातःस्यादतआह॥नभिशंकितइतिअयंभावः॥नह्यभिमानत्यागेनदे
हत्यागोभवति॥सुषुप्त्यादिषुतथादर्शनात्ध्यानिनांचिरकालदेहावस्थानस्मृतेनवाचक्रादिभेदेनापिशंकेति॥ततइति-
तदनंतरंयोगीकंठमध्येनाडिसंचयसमूहसंधीकुर्वन्छिंद्यादित्यनुषंगः॥कियत्योनाड्यःसंतीत्यपेक्षायांमध्यमसंख्या
माहकेतिवराउत्तमाःइडापिंगलादक्षिणेत्येवंवक्ष्यंतेरक्षतुशब्दयोगः॥शिष्याणामाशिषेविद्यासंप्रदायोच्छे
दोमाभूदिति॥वरंस्थानंसुषुम्याख्यंतंतद्विधातारंपुलिंगनिर्देशात्॥किंतत्स्थानंकश्चत्तद्विधातेत्यपेक्षायामाह॥सु
षुम्नान्विताःपरेपुरुषेब्रह्मणिलीनाविरजाःनिर्मलाब्रह्मरूपिणीब्रह्मस्थानत्वात्॥सुषुम्नेवचरंस्थानंपरएवतद्विधातेत्य
र्थः॥कथंभूतासुषुम्नानाडीषुमध्येद्वासप्ततिसहस्राणिनाडीःप्रतीतेतिलमुत्सीषंगंडूगंडूकंयथा॥गंडूकाधारउक्तमां
गंतिष्ठत्येवंसुषुम्नाधारेसर्वानाड्यःस्थिताइत्यर्थः॥तेतिलेगंडुकेप्रोक्ताःतेतिलंकरणंताइतिविभ्यः विधंतइतिध्यानयो-
गनताःछिद्यंतेतासंछिन्नत्वाद्ब्रह्मवत्यदेशेषुक्रांतोजीवस्यगमनंनभवतियदुक्तंतयाईमायन्मृतत्वमितिविवदंत्याउक्त
मणेभवंतीतिएकासुषुम्नानछिद्यते॥तस्याःपरमसूक्ष्मत्वेनमनोविषयतायोग्यत्वान्मनोविषयस्यैवयोगेनछेद्यत्वात्॥ऋ
भुनयात्रसिद्धिंहित्वाच्च॥योगेतियोगएवनिर्मलाधारस्यतेनक्षुरेणमनसाअकामवर्चसापादस्योपरिमृष्ट्वान्निर्मलो
जसानाडीशतंछित्त्वासांछेदेतत्प्रभृत्यद्वासप्ततिसहस्रस्थापिछेदःसिद्धःधीरोधीमान्प्रभावाद्योगसामर्थ्यात्॥इहज-
न्मनिमनुष्यशरीरेतेतिलेनसुषुम्नायाःसाद्यंतरमाह॥जातीतिजातीमालतीतस्याःपुष्पाणांसमायोगःसंयोगः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ध्यायथा॥प्रसाधकाःतैतिलंगंडूकंवास्यंवासेनपरिमलेनयुक्तंकुर्वंतिएवंनाडीशुभाशुभेभविष्यतीतिविपरिणामः॥पुन
र्यादिवासाभ्रयोयथा॥गंडूकंभवतितथेयंनाडीश्वासनाभ्रयइत्यर्थः॥तर्हिकिंकार्यमतआह॥तामितिचिंतनफलमाह॥तत
दितिप्रपद्यतेसंपद्यते॥विदितंचित्तंयेनसविदितचित्तः॥मात्राधारेणामात्राह्यादशादिसंख्याः॥प्रणवमात्रास्तारंधारय
स्यमनःशुरस्यसत्तथातेनतंतुश्वासनारूपंनाडीरूपंचहिरुक्तिनिश्चयार्थासमास्यर्थइतिशब्दः॥अयमारोहप्रकारउ
क्तांतिसमयेखेचरीपटलेउक्तः॥तद्यथा॥यदातुयोगिनोबुद्धिस्यक्तंदेहमिमंभवेत्॥तदास्थिरामनोभूत्वामूलाधक्ति
समुज्वलं॥सूर्यकोटिप्रतीकाशंभावयेच्चिरमात्मनः॥आपादतलपर्यंतप्रसृतंजीवमात्मनः॥संहृत्यक्रमयोगेनमूलाधा
रपद्मंनयेत्॥तत्रकुंडलिनींसक्तिंसंवर्त्तानलसन्निभां॥नीत्वानिजेंद्रियाणिग्नसंतींचिंतयेद्धिया॥संप्राप्यकुंभकावस्थां
तडिज्ज्वलनभासुरां॥मूलादिनाभ्यतिदीप्तस्वाधिष्ठानपद्मंलयेत्॥तत्रस्थंजीवमखिलंग्नसंतींचिंतयेद्धृती॥तडित्कोटिप्र
तीकाशांतस्मादुन्नीयसत्वरं॥मणिपूरपद्मंप्राप्यतत्रपूर्ववदाचरेत्॥तत्रस्थित्वाक्षणंदेविपूर्ववद्योगमार्गवित्॥अनाहः
तंनयेद्योगीतत्रपूर्ववदाचरेत्॥ततोविशुद्धादानीयभ्रुंडलींपूर्ववच्चरेत्॥उन्नीयतस्माद्भ्रूमध्येवीरक्षीरंग्नसन्पुनः ग्रस्तं
क्षीरंमहाशक्त्याकोटिसूर्यसमप्रभां॥मनसासहधार्गास्थाभित्वाब्रह्मार्गलंक्षणात्॥परामृतमहांभोधौविश्रांतिंत
तःकारयेत्॥तत्रस्थंपरमंदेवंशिवंपरमकारणं॥शक्त्यासहसमायोज्यतयोरैक्यंविभावयेदिति॥शांतिमुक्तांतिकालं
बंधयित्वाययिजीवितुमिच्छेत्तदावरोहंकुर्यादित्यपितत्रोक्तं॥तद्यथा॥यदिवांछितुमुद्युक्तःकालंकालविभागवित्॥का
लस्तुयावद्भ्रजतितावत्तत्रसुखंवसेत्॥ब्रह्मद्वारार्गलस्याधोदेहंकालंप्रयोजनं॥तस्माद्ध्वंपदंशेयंनहिकालप्रयोजनं॥यदादेह्या
त्मनःकालमतिक्रांतंसपश्यति॥तदाब्रह्मार्गलंभित्वाशक्तिमूलपदंनयेत्॥शक्तिदेहप्रसूतंसुस्वजीवंचेंद्रियैःसह॥तत्तत्क
र्मणिसंयोज्यस्वच्छदेहसुखंभवेत्॥अनेनदेवियोगेनबंधयेत्कालमागतमिति॥आरोहरोहाभ्यासएवसर्वयोगशा ॥रामा॥
स्त्रेषुमुख्योयागइति॥इष्टव्येसच्चुरिकायांप्रकाशितः॥नारायणेनरचितास्मृतिमात्रावलंबिना॥अस्पष्टपद- ॥३॥
व्याख्यानादीपिकाचुरिकाभिधे॥ ॥इतिचुरिकोपनिषद्दीपिकासमाप्ता॥छ॥ ॥चुल्लिकाचंडिकालोकेस्तं
भाग्नंतीक्ष्णमुच्यते॥तद्वद्दंतभागोयंचतुरखंडाहिपंचमी॥योगफलमात्मदर्शनंसचात्मासन्निहितोपिकंठस्थहारवत्परा
गृहस्थिनागुरुंविनानदृश्यतेइतितद्बोधनार्थमुत्तरग्रंथस्तत्रहाररूपकेणाहस्यादमितिअष्टोप्रकृतिरूपाःयादाअवयवा